*Journal of Advances and Scholarly Researches in Allied Education*
*Vol. 16, Issue No. 4, March-2019, ISSN 2230-7540*

# स्मृतिप्रतिपादितं न्यायालयस्वरूपविमर्शः

**Kuldeep Singh***

Research Scholar, Department of Theology, Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth, New Delhi

***सार - संस्कृतशास्त्रपरम्परा वैदिककालादेव मानवस्य शिवत्वसिद्धये नितराम् उपकारिणी विराजते। वेदानामेव वेदप्रतिपादितधर्मादिसाधनानां वा अर्थप्रतिपत्तये स्मृतिशास्त्रं प्रविधरूपेण ऋषिभिः कलितम्। स्मृतिशास्त्रे न्यायस्य यत् स्वरूपमवतरितमस्ति तच्च स्वरूपं वेदेष्वपि लभ्यते। वैदिककाले 'सभा' इति शब्दः न्यायालयपर्यायरूपेण परिलक्ष्यते। वेदेषु सभासमितिशब्दयोः प्रचुरविचारः लभ्यते। वसिष्ठेन सभा स्थाने 'सदः' इति शब्दप्रयोगः न्यायालयस्य कृते कृतः। "अथ व्यवहारः। राजमन्त्री सदः कार्याणि कुर्यात्।"[1] राजमन्त्री न्यायालयस्य कार्यम् अथवा व्यवहारावलोकनकार्यं करोति स्म। शंखः स्वकीये स्मृतिग्रन्थे न्यायालयसंज्ञा 'धर्म-स्थानम्' इति रूपेण प्रस्तौति। धर्मस्थानस्य निर्माणं शंखेन पूर्वदिशि प्रास्तावि। तत्र जलाग्नेः च व्यवस्था भवेत्। सम्भवतो अग्निव्यवस्थापनं तत्र दिव्यपरीक्षार्थमासीत्।[2]***

----------------------------------x----------------------------------

मनुना मनुस्मृतौ अस्य संज्ञा सभा एव विहिता वर्तते। व्यवहार वेदितुं इक्ष्वाको राजा ब्राह्मणैः सह अथ च मन्त्रज्ञमन्त्रिभिः सह विनीतवेशेन प्रवेशं कुर्यात्।[3] सभायां राजा यस्मिन् आसने उपविशति स्म तस्य आसनस्य संज्ञा 'धर्मासनम्' इति आसीत्। धर्मासने उपविश्य उत्थाय वा दक्षिणहस्तोत्थानपूर्वकं राजा न्यायव्यवस्थायाः अवलोकनं करोति स्म। अत्र दक्षिणहस्तोत्थानस्य अर्थः वर्तते अर्थिनं प्रत्यर्थिनं प्रति प्रश्नोत्तरकाले दक्षिणहस्तेन सङ्केतं विदध्यात्।[4]

मनुस्मृतौ उत्थायोपविश्य वा न्यायव्यवस्थायाः नियमविधानं प्रस्तावितमस्ति। त्रिभिः सभ्यैः सह राजा अभियोगान् अवलोकयेत्।[5] न्यायालये त्रयाणां वेदज्ञब्राह्मणानां एव्च राजानियुक्तः एकः प्राङ्विवाकस्य उपस्थितिः आवश्यकी आसीत्। अस्याः सभायाः संज्ञा ब्राह्मणसभा इति आसीत्। साररूपेण स्पष्टं भवति यत् न्यायालये योग्यन्यायाधीशस्य नियुक्तिः भवेत्।[6] वाल्मीकियरामायणे सभायाः लक्षणमित्थं प्रस्तुतमस्ति। यस्यां सभायां वृद्धाः न भवन्ति सा सभा सभा न भवति। ते वृद्धाः न भवन्ति ये धर्मं न दिशन्ति। सः न धर्मः यस्मिन् सत्यं न भवेत् अथ च सत्यं नास्ति यत् छलभरितं भवेत्।[7] नारदस्मृतावपि अस्य संज्ञा सभा एव वर्तते।[8] वृहस्पतिना सभागृहनिर्माणविषयः निर्दिष्टः यत् अस्य निर्माणं दुर्गस्य आभ्यन्तरे भवेत्। तत् स्थानं जलवृक्षैः च युक्तं भवेत्। अस्य पूर्वाभिमुख्यमभीष्टं भवति।[9]

स्मृतिचन्द्रिकाकारः अस्मिन् विषये विशेषतथ्यान् प्रस्तौयति। सभायां माला, धूपम्, आसनादयश्चः भवेयुः। बीजरत्नम्, देवस्य प्रतिमा, सचित्रम्, जलाग्नियुक्तं च स्थानं भवेत्। इमे सर्वेऽपि प्रकल्पाः वातावरणस्य शुध्यर्थं सम्भवेत्। बीजरत्नस्य का आवश्यकता इति विषयः विचारणीयोऽस्ति। देवमूर्तेः आवश्यकता अनुमानतः शपथग्रहणार्थम् आसीत्। साम्प्रतिके कालेऽपि न्यायलये गीताकुरानादीनां ग्रन्थानां उपस्थितिः वर्तते। तरूच्छायायाम् उपवेशनस्य व्यवस्था आसीत्। न्यायालस्य इदं स्वरूपं साम्प्रतमपि परिलक्षितं भवति।

स्मृतिचन्द्रिकायाम् एव्च पारस्करगृह्यसूत्रे सभायां राज्ञः प्रवेशविधिः लभ्यते। प्रातः शौचादिनिवृत्तौ राजा-गुरु-ज्यौतिष-वैद्य-देव-ब्राह्मण- पुरोहितादिनां पूजनं पुष्पालङ्कारवस्त्रादिना सम्पूज्य एव्च गुरोः अभिवादनपूर्वकं सुमुखीसभायां प्रवेशं कुर्यात्।[10] अत्र 'सुमुखाम्' इति विशेषणदलं न्यायालयद्वारस्य सौन्दर्यवैषद्यदृढत्वादीनां परिचयः जायते। तस्मिन् काले न्यायालयस्य कालः प्रातःकाल एव आसीत्। कौटिल्यः लिखति यत् दिवसस्य द्वितीयभागे राजा जनपदानां कलहमुपशमयेत्।[11] दिवसस्य अष्टभागेषु विभाजनं विभजेत्। मेगास्थनीजमहोदयेन लिखितमस्ति यत् राजा आदिनमपि न्यायालये उपविशति।[12]

www.ignited.in

सभायां कुत्र कस्य आसनं भवेत् इत्यस्मिन् विषये स्मृतिचन्द्रिकारः कथयति यत् राजा पूर्वाभिमुखमुपविशेत्, सभ्य उत्तराभिमुखमुपविशेत्, गणकः पश्चिमाभिमुखं लेखकः दक्षिणाभिमुख्चोपविशेत्।[13] अर्थीनां प्रत्यर्थीनां च उपवेशनस्य निर्देशः अस्मिन् ग्रन्थे नास्ति, पर्च अनुमानतः तेषां पश्चिमाभिमुखं राज्ञः सम्मुखे आसनं सम्भवेत्।

अत्र गणकः इत्यस्य अभिप्रायः अङ्कः (एकाउन्टेट) इति स्वीकर्तुं शक्यते पर्च अस्य न्यायालये का आवश्यकता अस्मिन् विषये विचारः कर्तव्यः एव। लेखकः तु लिपिकरूपेण सम्भवति।

अपरार्कः सभायाः भेदचतुष्टयं प्रस्तौति- प्रतिष्ठिता, अप्रतिष्ठिता, मुद्रिता, शासिता च। ग्रामे या सभा भवति सा प्रतिष्ठिता सभा उच्यते। अरण्ये या सभा भवति सा अप्रतिष्ठिता सभा कथ्यते। एषा सभा एकस्मात् स्थानात् अन्यस्मिन् स्थाने सम्भवति। एषा सभा युद्धबन्दिनां सम्भविष्यति। साध्यक्षासभायाः संज्ञा मुद्रिता भवति। अस्यां सभायाम् अध्यक्षस्य हस्ते मुद्रा भवति यया व्यवहारकाले पत्राणां मुद्रणं भवेत्। यस्मिन् व्यवहारे राज स्वयमुपविशति सा सभा शाशितासंज्ञया उच्यते।[14] व्यवहारमातृकायां सभायाः तुलना यज्ञेन सह कृता वर्तते। यज्ञे विष्णोः पूजा भवति पर्च व्यवहारे राज्ञः पूजा भवति। विजयी एव यजमानः पराजितश्च पशु इति कथ्यते, यस्य बलि भवति। पूर्वोत्तरपक्षः आज्यो भवति। प्रतिज्ञा हविष्यः वर्तते त्रयो वेदाः शास्त्रमस्ति सभ्यश्च ऋत्विजो भवति। दण्डे प्राप्तरूप्यकाणि दक्षिणा वर्तते।[15]

**यज्ञे सम्पूज्यते विष्णुर्व्यवहारे महीपतिः।**

**जयी तु यजमानोऽत्र जितः पशुरुदाहृतः।।**

आरण्यानाम् अरण्ये न्यायः भवति स्म। तेषां कृते तत्र एव न्यायालयः अभवत्। एवमेव सैनिकानां सेनायाम् अथ च व्यापारमण्डलस्य न्यायालयस्य व्यवस्था मण्डले एव अभवत्। इमौ न्यायालयौ स्थायी-अस्थायी उभयरूपेण आस्ताम्।

**ये त्वरण्यचरास्तेषामरण्ये करणं भवेत्।**

**सेनायां सैनिकानान्तु सार्थेषु वाणिजां तथा।।[16]**

अत्र न्यायालयस्य कृते करणशब्दस्य प्रयोगो वर्तते। पूर्वस्मिन् नाटकादिषु ग्रन्थेषु न्यायाधिकरणम्, धर्माधिकरणमि्चेत्यादिशब्दानां प्रयोगः लभ्यते। भृगुना स्थानभेदादिना व्यवहारसभायाः पञ्चदशभेदाः ख्याताः। कात्यायनः सभास्थाने न्यायालयं धर्माधिकरणचेति शब्देन परिचिनोति। स्मृतिचन्द्रिकायां तेषां वचनम् इत्थं वर्तते-

**धर्मशास्त्रविचारेण मूलसारविवेचनम्।**

**यत्राधिक्रियते स्थाने धर्माधिकरणं स्मृतम्।।[17]**

मूलसारपदेनात्र अभियोगस्य मूलविषयस्य विवेचनं स्वीक्रियते। स्मृतिचन्द्रिकायां पितामहस्य वचनमाहृत्य सभायाः अष्टौ अङ्गानि निर्दिष्टानि लेखकः, गणकः ज्यौतिषो वा, शास्त्रम्, साध्यपालः, सभासदः, हिरण्यः, अग्निः, जल्च। अत्र हिरण्यं इति स्थापनस्य प्रयोजनं किं अस्मिन् विषये विचारणीयमस्ति।

ज्यौतिषः त्रिस्कन्धज्योतिषस्य ज्ञाता भवेत्, विश्वासयोग्यः श्रुताध्ययनसम्पन्नो च भवेत्। लेखकः साधुस्पष्टलेखकः, वैयाकरणः, क्रोधशून्यः, लोभरहितः सत्यवक्ता च भवेत्। सभ्यपालः अर्थीनां प्रत्यर्थीनां च ख्यापकः, यथाकालं कार्यकर्ता, वंशपरम्परया दृढः एव ्च सभ्यानाम् आदेशपालकः भवेत्।[18]

त्रिस्कन्धज्योतिषाभिज्ञं स्फुटप्रत्ययकारणम्। इत्थं द्रष्टुं शक्यते न्यायालयस्य कृते सर्वाधिकप्रचलितः एवं ब्रह्मर्षिसम्मवतः सभाशब्दः एव वर्तते। न्यायालयस्य कृते सभाशब्दप्रयोगः वैदिककालादेव आसीत्। एतदतिरिच्य धर्मस्थानम्, करणम्, धर्माधिकरणादिशब्दानां व्यवहारः न्यायालयस्य कृते प्रचलितोऽस्ति। न्यायालयस्य स्थानं भवनं-आसनम् चापि अधिकारीनिर्णयादिनां विवेचनं संक्षेपेण तत्थ्यपुरस्सरं मया प्रास्तावि। अनेन स्पष्टं भवति यत् तस्मिन् समये न्यायालयस्य उत्कृष्टस्वरूपम् आसीत्।

## सन्दर्भ ग्रन्थ सूचीः


1. वशि. स्मृ. 16/1-2

2. धर्मस्थानं प्राच्यां दिशि तच्चाप्युदकैः समवेतं कुर्यात्। स्मृ.चं. 19 में उद्धत।

3. व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः।

   मन्त्रज्ञैः मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम्।। मनु. 8/1

4. तत्रासीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम्।

   विनीत-वेषाभरणः पश्येत् कार्याणि कार्यिणाम्।। मनु. 8/2

5. सोऽस्य कार्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः।


www.ignited.in

सभामेव प्रविश्याग्रयामासीनः स्थित एव वा। मनु. 8/10

6. यस्मिन् देशे निषीदन्ति विप्राः वेदविदस्त्रयः।

राज्ञश्चाधिकृतो विद्वान् ब्रह्मणस्तां सभां विदुः।। मनु. 8/11

7. न सा सभा यत्र न सन्ति वृद्धाः न ते वृद्धाः ये न वदन्ति धर्मम्।

नासौ धर्मो यत्र न सत्यमस्ति न तत् सत्यं यच्छलेनानुबिद्धम्।। वा.रा. 7/59

8. सभायां न प्रवेष्टव्यं वक्तव्यं वा सम्जसम्।

अब्रुवन् विब्रुवन् वापि नरो भवति किल्विषी। ना.स्मृ. 3/10

9. दुर्गमध्ये गृहंकुर्यात् जलवृक्षान्वितं पृथक्।

प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत् सभाम्।। वृ.प.मा. पृ.21 में उद्धत।

10. प्रातरुत्थाय नृपतिः शौचं कृत्वा समाहितः।

गुरून् ज्योतिर्विदो वैद्यान् देवान् विप्रान् पुरोहितान्।।

यथार्हमेतान् सम्पूज्य सुपुष्पाभरणाम्बरैः।।

अभिवन्द्य च गुर्वादीन् सुमुखां प्रविशेत् सभाम्।। वृह.स्मृ.च. 16

11. द्वितीये पौर-जानपदानां कार्याणि पश्येत्।। कौ.अर्थ. 1/18

12. फ्रैगमेण्ट पृ. 70-71

13. पूर्वाभिमुखस्तूपविशेद्राजा सभ्या उदङ्मुखाः।

गणकः पश्चिमास्यस्तु लेखको दक्षिणामुखः।। वृह.स्मृ.च. 20

14. प्रतिष्ठिता पुरे ग्रामे चला नामाप्रतिष्ठिता।।

मुद्रिताध्यक्षसंयुक्ता राजयुक्ता च शासिता।। बृह.स्मृ. च. 18

15. यज्ञे सम्पूज्यते विष्णुव्र्यवहारे महीपतिः।

जयी तु यजमानोऽत्र जितः पशुरूदाहृतः।।

पूर्वपक्षोत्तरावाज्यं प्रतिज्ञा च हविः स्मृता।

त्रयी शास्त्राणि सभ्यास्तु ऋत्विजो दक्षिणा दमः। बृ.व्या.मा.पृ. 284

16. वह.दण्डवि. पृ. 15 में उद्धत।

17. स्मृ.च. 19

18. त्रिस्कन्धज्योतिषाभिज्ञं स्फुटप्रत्ययकारणम्।

श्रुताध्ययनसम्पन्नं गणकं योजयेन्नृपः।।

स्फुटलेखं जितक्रोधमलुब्धं सत्यवादिनम्।

साध्यपालस्तु कत्र्तव्यो राज्ञा साध्यस्य साधकः।

क्रमायातो दृढः शूद्रः सभ्यानां च मते स्थितः।। व्यास-स्मृति च.पृ. 17

---

**Corresponding Author**

**Kuldeep Singh***

Research Scholar, Department of Theology, Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth, New Delhi